प्रायश्चित्तकुतूहलस्या
धानप्रकरणस्यानुक्रमः
१ मंगलाचरणं
१ अग्निहोत्राकरणेप्रा०
१ अग्न्युत्सर्गप्राय०
२ चांद्रायणप्रकारः०
२ परिवेत्तृत्वप्राय०
२ यजमानस्यऋत्विजांचस्व
मेरेतोविसर्गप्रा०
३ आधानेपत्नीरजस्वित्वप्रा०
३ गोपित्तृयज्ञाग्निनाशेप्रा०
४ आधानेसंभारनाशेप्रा०
४ अग्निप्रणीतउल्मुकनाशे०
४ सर्वौषधिहोमात्प्रागग्नि
नाशेप्रा०
४ अर्धाधानविषयेप्रा०
५ ब्रह्मौदनाग्निनाशेप्रा०
५ ब्रह्मौदनस्थालीभेदने०
५ ब्रह्मौदनचरोरुल्केप्रा०
५ ब्रह्मौदनानंतरंसमारो
पात्प्रागनुगमनेप्रा०
५ मंथनानंतरंज्वालोग्निरुद्वातश्चेत्प्रा०
६ गार्हपत्याधानात्प्रागाहवनीया
धानेऽग्नेप्राय०
६ गार्हपत्याधानानंतरंतनुहवि
षापूर्वमग्निनाशेप्रा०
६ अग्निहोत्रदर्शपूर्णमासोपक्र
मात्प्रागग्निनाशेप्रा०
६ कस्याप्यंगस्याकरणेप्रा०
६ समारोपोत्तरमरणीनाशेप्रा०

७ आधानकालेचंद्रसूर्यग्रहे०
७ पुनराधाननिमित्तानि०
१० आधानानंतरंविवाहेकृतेऽग्निद्वयसंसर्गविधिः प्रा०
११ आहिताग्निव्रतानि०
११ आहिताग्निव्रतलोपेप्रा०
१२ आहिताग्नेरेकाहरात्रसराज्ञभक्षणेप्रा०
१२ आहिताग्नेःसुनोर्दरेप्रा०
१२ निषिद्धयानारूढेप्राय०
१२ अग्निहीनगृहेभोजनेप्रा०
१३ शूद्रान्नभक्षणेप्राय०
१३ आमान्नप्रतिग्रहदोषः०
१४ केवलाग्निपक्वशूद्रान्नेप्रा०
१४ दधापक्किनोऽभक्षणेप्रा०
१४ रात्रौऽभक्षणेप्राय०
१५ अग्निहोत्रार्थंशूद्रादिद्रव्ययाचनेप्रा०
१५ चौर्यादिव्यतिरिक्तद्रव्याजनेनाग्निहोत्रेकरणेप्रा०
१५ दुष्टप्रतिग्रहेणयत्नकरणेप्राय०
१६ ग्राममध्येऽग्न्यवस्तिष्टेप्रा०
१६ गुरोऋत्विजांचप्रातिकूल्येप्राय०
१६ द्वितीयभोजनप्रशंसानित्यकर्मलोपेप्राय०
१८ नित्यकर्मलोपेऽनुकूल्यंप्रा०
१८ दिवामैथुनेप्रायश्चित्तं०

१८ नग्नस्त्रीदर्शनेप्राय०
१८ श्रुतादिभयदर्शनेप्रा०
१८ बहुभार्यस्याग्निशुश्रूषायांविरोधःप्रा०
१९ दर्शपूर्णमासलोपेप्रा०
१९ संध्योपासनलोपेप्राय०
१९ पितृयज्ञायुयेप्राय०
१९ कक्षोत्तरीयंविकर्मकरणेप्राय०
१९ दग्धस्यूतादिवस्त्रपरिधानेप्राय०
१९ वस्त्राभावेऽनुकल्पमाह०
१९ कुशादिपवित्रधारणंप्रा०
२० स्नानंविनाजपहोमादिकरणेप्राय०
२० होमानुत्तरोधेनगृहेस्नानंप्राय०
२० होमपूजाकालेऽधर्पुंड्र०
२० धर्मकालेऽधरांगस्पर्शनिषेधः०
२० होमकालेमौनत्यागेप्रा०
२० स्वयंहोमेफलाधिक्यंप्रा०
२० अन्यद्वारार्धफलंप्राय०
२० होमेऋत्विगनुकल्पःप्रा०
२० होमकालेदंपत्योरसन्निधानेप्राय०
२१ होमेस्त्रियःपुरुषस्यनिषेधः०
२१ होमानुरोधेनगृहेसायंसंध्याकार्या०

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

२१ विहरणोत्तरबहिर्गमननिषेधः०
२१ कुशसमिदादिहरणकालःप्राय०
२१ आहिताग्नेर्वैधात्रवासनिषेधः०
२२ अग्निपरिचर्याप्रश्नांसाप्रा०
२२ द्रव्यार्जनाप्रवासोनतीर्थार्थंप्रा०
२२ रात्रियोजनाधिकप्रवासनिषेधः०
२२ अहोरात्रप्रवासनिषेधः०
२३ पर्वणिप्रवासनिषेधः०
२३ पत्न्यासहप्रवासेमैथुनंनकर्तव्यं०
२३ आहिताग्नेर्वत्सरमध्येक्षणंप्राय०
२४ परान्नपक्वभक्षणनिषेधः०
२४ अनाहिताग्निगृहेभोजननिषेधः०
२४ अग्नेर्ज्यानगृहेभोजननिषेधः०
२५ अथक्षत्रियधर्माःइत्याधानस्यप्रकरणस्यानुक्रमणिकासमा
सा॥ ॥छ॥ ॥श्री

A050

॥अथप्रायश्चित्तकुतूहलेआधानप्रकरणं॥
॥पत्र२५॥

॥श्रीगणेशायनमः॥ ॥अथाधानप्रकरणं॥ ॥आहिताग्नेश्चजनकेभार्यायिचसोद
१ रे॥आदधीतस्वयंजायामयाप्यदर्शमेहनि॥नदर्शक्रमेदोषःसइदानींनिरूप्यते॥तत्र ये
विधुयात्तवःक्वेयो॥गोवधोव्रात्यतास्तेयमद्यपानंचानपक्रिया॥अनाहिताग्नितापप्यवि
क्रयःपरिवेदनंइति॥उपपातकिनस्त्वेतेकुर्युश्चांद्रायणंनराः॥पराकमथवाकुर्युरिति
॥उपपातकशुद्धिःस्यादेवंचांद्रायणेनवा॥पयसावापिमासेनपराकेणाथवापुनरिति
॥इदंचाकाम चारे॥कामचारेतुत्रैमासिकमितिमाधवः॥आहिताग्नेर्बुद्धिपूर्वकम
ग्नित्यागेशोधः॥अशुत्सादीसंवत्सरंप्राजापत्यंचरेत्कोचिद्याज्ञ इति॥हारीताः १

तिक्रमेऽहमुपवासः॥मासातिक्रमेद्वादशाहं॥संवत्सरातिक्रमेमासोपवासः॥पयोभ
क्षणंवा॥अकामकारेतुप्राणायामशतमादशरात्रं॥उपवासःस्यादाविंशतिरात्रं॥त्रि
रात्रमुपवासेषष्टिरात्रं॥अतऊर्ध्वमासंवत्सरान्प्राजापत्यंऊर्ध्वंकालबहुत्वेदोष
बहुत्वमितिभारद्वाजगृह्ये॥नास्तिक्यादग्नित्यागे॥योग्निंत्यजतिनास्तिक्यान्प्राजापत्यं
स्यउ चरेद्विजइतिव्याघ्रवचसिप्राजापत्यंपलक्षणत्वात्सागकालस्यगोरवेव्रतांतराण्यू
त्यानीतिमाधवः॥यस्तुपित्रादेरनाहिताग्नितांज्ञात्वापिस्वयमाधानंकरोतिसपरि
वेत्ता॥तस्यकामकारेसंवत्सरंप्राजापत्येनशुद्धिरितिहारीतः॥शोभनरक्त॥परिवि

२ तिः परिवेत्ता चसंवत्सरं प्रात्राणग्रहेषुभैक्ष्यंचरेयातामिति॥ प्रकामकारेतुत्रैमासिकमितिमनुः॥ प्रायश्चित्तप्रदीपेतु॥ ज्येष्ठेग्न्याधानरहितेसयमाधानंकरोति सपर्याधानः॥ ज्येष्ठःपर्याहितः॥ प्रनयोःस्मृत्युक्तप्रायश्चित्तानंतरंमनस्वतीहोमइति॥ प्राधानसंकल्पादूर्ध्वंयजमानस्यवरणोर्ध्वमृत्विजांचज्ञातावेोचसंभवेस्नानमात्रेणशुद्धिरिति॥ एतत्प्रपंचोग्रेवक्ष्यते॥ प्रथवतानामृत्विजांयजमानस्यवास्वग्नेरेतोविसर्गेप्रायश्चित्तंप्रश्ने॥ स्मार्त्तवदाज्यंसंस्कृत्य प्रायश्चित्त इमंमेवरुणतत्त्वायामीतिद्वाभ्यांस्रुवाहुतीर्जुहुयात्॥ वरुणायेदमितित्या २

गः॥ ततःपुनर्मामैत्विंद्रियमित्यनुकंजपेदितिप्रायश्चित्तप्रदीपे॥ प्राधानप्रथमप्रयोगेप्रक्रांतेसंकल्पादूर्ध्वंपत्न्यामनालंभुकायांप्रक्रांतेप्रयोगमुत्सृज्यकालांतरेपुनःप्रक्रम्यादधीत॥ वहुपत्नीकोप्येवं॥ इदंदक्षिणादानांते॥ दक्षिणादानोर्ध्वंचेदपरुध्यसमापनं॥ पाकुतेरनंतरंअनालंभुकायामपरुध्यसमापनं॥ प्रयोगमुत्सृजेदितिकेचित्॥ गार्हपत्याधानोत्तरमनालंभुकाचेत्तामपरुध्यसमापयेत्॥ ततःपूर्वंचेत्प्रयोगोत्सर्गइतिप्रातंद्वेयां॥ द्वितीयाधानेतुसंकल्पात्पूर्वमनालंभुकायांका

३ न्तरे॥ संकल्पोर्ध्वमनाहुतीर्हुत्वा यां तु अपरुध्य समापनमिति विशेषः॥ अ
धानेसंभरतानांसंभाराणांअमेध्यादिनाउपहतावपहतौ याछेदेदाहेवा
न्यस्मिन्देशस्यवानाशेतत्तज्ज्ञानीयंतत्तन्मंत्रेणादायतत्तत्स्थाने पूर्ववत्
संदधित्वाज्यंसंस्कृत्यब्रह्मौदनाग्नेस्त्रुवाहुतीर्जुहुयात्॥ त्वमग्नेअयासि॰
॥ प्रजापतेनत्वदे॰॥ अग्नयइदं॰॥ प्रजापतय॰॥ यस्यनाशस्तस्यतन्मंत्रे
णपुनःसंभरणं॥ सर्वेषांतु गपन्नाशेसर्वैर्मंत्रैःपूर्ववत्संभरत्येवमेव
कुर्यात्॥ गोपित्यग्नाग्निनाशेयथापूर्वमाहृत्याज्यंसंस्कृत्यस्त्रुवेणाज्य ३

स्याहुतीःक्रमेणागोपित्यग्नाग्नेर्जुहुयात्॥ अतिप्रणीतोल्मुकनाशेपुनरा
हृत्योल्मुकाग्नेर्दक्षिणाग्नेश्चप्रत्येकंव्यस्ताहुतीर्जुहुयात्॥ गोपित्यग्नेसं
भारनाशेपिपूर्ववत्संभारनाशेत्तेप्रायश्चित्तंगोपित्यग्नेःकुर्यात्॥ आ
श्वत्थायनयजमानःसर्वौषधिहोमात्प्रागोपासनाग्न्यनुगमनेअयाश्चाग्नेः॰
भेषजंरचाहेतिपुनःसंधायसर्वौषधहोमादिकुर्यात्॥ सर्वौषधहोमादूर्ध्वं
ब्रह्मौदनपाकात्प्राग्यद्यनुगतस्तदपिपूर्ववत्प्रायश्चित्तं॥ ब्रह्मौदनपाका
दूर्ध्वंसमारोपणात्प्रागनुगतावप्येवं॥ संवत्सरादिधारणपक्षेपुनःपुनरु

४ क्षतेपि सर्वौषध होमादिब्रह्मौदनपाकंओपासनसाध्य कर्माणिचतत्रैव
विरुध्यात्॥ओपासनत्वानुगमनंत्व॥इदंचसर्वंसर्वाधानविषयं॥अर्धा
धानपक्षेअर्धावघ्निष्टादेवाहरणंसर्वप्रायश्चित्तंनायाश्चेतिविशेषः॥
पुनराधानेसर्वाधानिनओपासनाग्न्यभावात्॥ब्रह्मौदनार्थमग्न्युत्पत्ति
र्बोधायनेनोक्ता॥पुनस्त्वादित्येति॥एवंसिद्धेग्नौसर्वौषधहोमात्प्रागनु
गतेयाजुषं॥अयाश्चाग्नेरनभिशस्तीश्च सत्यमित्वमयासि॥अ
यसामनसाधनोयसाहमूर्हिषेयानोधेहिभेषज॥स्वाहेतिमन्त्रेवि ४

नियोजयेत्॥अभ्यक्तायनोपि॥अर्धाधानिनःओपासनत्वादिदमेवप्रायश्चित्तं॥
५ सर्वाधानपक्षेपिरज्ज्वादिनिमित्तेनप्रक्रांतंप्रयोगमुत्सृज्यकाळांतरेपुनरारंभ
पक्षेपिस्वशाखीयप्रायश्चित्तेनैवाग्निसिद्धिः॥एवमाग्नेयादिनापुनराधेयेपिबोध्यं
॥ब्रह्मौदनार्थस्थालीमेदेभग्नांतामभिमंत्रयेघर्मोदेवानित्यन्योस्या
मीनिधायभग्नानसुप्रक्षिप्यब्रह्मौदनाग्नौसर्वप्रायश्चित्तंजुहुयात्॥ब्रह्मौद
नार्थचरुस्थालीकेवश्यमाणदर्शपूर्णमासीकेप्रायश्चित्तंनेयं॥अभ्यक्ताज्यौप
नाग्नौस्वभ्यक्तासमिधमाधेयाइतिरामाजारः॥विस्रस्तानाश्चेत्ताग्नाहितस्त

स्याग्नियैः समिधो नाधाग्निमाधत्तइतिऋतेः॥ पुनराधानप्रयोगः कर्त्तव्यः॥ ब्रह्मौ
दनपाकादूर्ध्वंनिष्पन्नात्प्रागग्न्यनुगमेपूर्ववदग्निमुत्सृज्य ब्रह्मौदनंतंकुर्यात्॥ मेध
नानंतरंज्ञातोग्निरुद्धातश्चेत्प्रक्रांतंप्रयोगमुत्सृज्यकालांतरेऽाद्धीत॥ केचित्तु
मंथनेनजातस्याग्नेर्वरदानात्सर्वमनुगमेपुनर्मंथनमेव॥ वरदानोत्तरंसंभारे
षुविधानात्प्रागग्न्यनुगमेपि॥ अनाज्ञातंपुरुषसंमितोयत्पाकइति॰ऋक्षे
त्र्यंजपित्वापुनर्मंथनमेवकार्यं॥ अनारब्धप्रयोगइत्यादुः॥ विहृताग्नयोमा
कश्चनांतरेणसंचारीदितिप्रेषोत्तरंमध्येसंचारेवक्ष्यमाणव्यवायप्रायश्चि ५

तंकार्यं॥ गार्हपत्याधानात्सर्वेष्वाहवनीयाधानेकृतेतंपुनरायतनेनिधाय
सर्वेप्रायश्चित्तंकृत्वाकालेप्रपायनंकार्यं॥ गार्हपत्येतनुहविषांपूर्वंप्रनुग
तेदक्षिणाग्नेोआहवनीयेचपूर्णाहुतेःप्रागनुगतेप्रयोगमुत्सृज्यकालांतरे
ऽाद्धीत॥ पूर्णाहुतेरूर्ध्वंतनुहविःसमाप्तेःपूर्वंदक्षिणाग्न्याहवनीययोरनु
गमेगार्हपत्यान्तेक्रमेणपूर्ववदाधानविधिनाधायसर्वेषधेोमादिवि
राजक्रमोपस्थानादितंत्रंकृत्वातत्रसंभारेसत्तिनिपूर्णाहुतिंकुर्यात्॥ अग्नि
होमो होत्रैपक्रमात्प्राक्सर्वाग्निनाशेगार्हपत्यमात्रनाशेवाऽग्न्याधानं॥ पो

२ +उभयोरन्वाधानंव्याहृतिभिरुपस्थानंचकृत्वातनुहविषांउपक्रांतप्रयोगमवशिष्टंसमापये
त्॥+

६ र्वमासोपक्रमात्प्रागपि सर्वाग्नीनांगार्हपत्यस्यवायस्यकस्याप्यग्नेर्वानाग्न्याधानंकर्त्तव्यमितिचंद्रिकायां॥ आश्वलायनस्तुनपुनराधानं॥ तन्मते पूर्णाहुत्यंतमेवाग्न्याधानं॥ इदमाधानंपूर्णाहुत्यंतंवेतिरामांडारः॥ द्वादशरात्रान्नस्नाग्न्यनुगतावप्येवं॥ पूर्णाहुतेःपूर्वंयस्यकस्याप्यंगस्याकरणेपूर्णाहुत्यनंतरंत्वेनोअग्नेसत्वन्नोअग्नइत्याहवनीयेस्रुवाहुतीहुत्वादक्षिणाग्नेरुपयःस्यादेतियजुर्भ्यांनिमित्तंस्रुवाहुतिंजुहुयात्॥ समारोपणोत्तरंप्राग्मंथनादरण्योरुपघातात्पहारनाशेपुन ६

क्रांतंप्रयोगमुत्सृज्यकालांतरेआदधीत॥ आहवनीयाधानवेलायांमेघादिनासूर्येनाविर्भवेत्॥ आधानपवमानेष्टयोर्मध्येरात्रौदर्शनेसूर्याचंद्रमसोर्वाग्रहणेनासूर्याचंद्रमसेतिषड्भिःस्रुवाहुतीर्जुहुयादितिकेचित्॥ उदुत्यंचित्रंदेवानामितिसूर्यग्रहे॥ नवोनवोयमादित्याइतिचंद्रग्रहइतिचंद्रिकायां॥ ॥ इत्याधानप्रायश्चित्तानि॥ ॥एवंसमाप्तोपाधानप्रयोगोयेनिमित्तैःपुनरावर्त्तंतेतान्यधुनाभिधीयंते॥ ॥ विनाग्निमिर्यदापत्नीनदीमंबुधिगामिनी॥ अतिक्रामेत्तदाग्नीनांविनाशःस्यादितिश्रुतिः॥ पत्नीसीमामतिक्रां २

७ तायज्ञमानरहैवचेत्॥ग्राहोमाघदिनागछेत्पुनराधानमर्हति॥रहैवबहिः
सीमांतेवाहिरेवेत्यर्थः॥रजोदोषेसमुत्पन्नेसूतकेमृतकेपिवा॥ग्रसन्नग्निमा
च्चिप्रःपुनराधानमर्हति॥ग्रत्यक्षाग्निमान्समारूढाग्निमान्चेत्यर्थः॥ग्रेषान्चा
रंभपक्षेकनिष्ठायारजोदोषादावपिनदोषः॥नदीसंतरणेग्नीनांसीमाति
क्रमणेतथा॥सर्वग्राधंतसीम्नोर्वास्वामिस्त्रष्टारोग्नयः॥ग्रत्यक्षमरणी
द्वारंवान्यथाग्निविनाशनं॥नाशापहारावग्नीनांयद्वारूढारणेयदा॥कुर्या
द्वैपुनराधानमितिबौधायनोब्रवीत्॥ग्रारूढोपियथाशास्त्रमवरूढो ७

नशास्त्रतः॥तृतीयेहोमकालेतुसंप्राप्तेपुनराहितिः॥ज्ञातोपिचविनाधस्म
स्यन्नीज्ञातंजपंविना॥ग्रायश्चित्तंविनाकाष्ठं मंथनंवेदितंविना॥लौकि
कस्यारतोत्पन्नादारभ्यावर्त्तयेत्पुनः॥यदिनावर्त्तयेद्दर्शे तादृशोवैजुहोति
च॥क्रियमानेपिलुप्येतहोमकालाष्टकात्परं॥लुप्तेहोमद्वयेप्राप्तेलोगाक्षे
त्रचोदितं॥उपघातक्रियालोपउपेक्षाचप्रमादतः॥चतुर्विधमिदंप्रोक्तं
पुनराधानकारणं॥ग्रसिद्धःकर्मणांलोप उपघातोस्त्रजादिना॥उपेक्षाच
ग्रयासादेप्रमादोनेरधारणं॥ग्रग्नावनुगतेयस्यहोमकालद्वयंव्रजेत्॥

८ उभयोर्विप्रवासे वा लौकिकोग्निर्विधीयते॥ अग्निहोत्रेण रहितः पंथानं यात
योजनं॥ आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति॥ वि
हायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति॥ होमकालात्ययेनास्य पुनराधान
स्य मिष्यते॥ सीमाग्रामं वास्तुनश्चेति॥ खरोष्ट्रवृषभं नारीं समारुह्याथवापु
मान्॥ योजनेयोजने कुछ्रमग्निश्चापि विनश्यति॥ सीमांतनुयदा पत्नी ग
करात्रमवस्थिता॥ वीरहत्याभवेत्तत्र पुनराधानमर्हति॥ अथास्यापवा
दः॥ पत्न्यंतरेथवापत्यौ कृताग्नानसमीपगे॥ तदापत्नीयथाकाममतिक्रा ८

मेन्नदीमपि॥ असमुद्गामिनीमित्याहुः॥ एकाकिनीयदापत्नी वह्निमादायग
छति॥ अग्निनाग्नौ परेत्वाकुर्म्यायानेनदुष्यति॥ नरश्चेकाकिनीपत्नी प्रयाया
दग्निभिः सह॥ राष्ट्रभ्रंशादिसंप्राप्तावुदितंयानमीदृशं॥ नक्काप्यालंभनंके
चिल्लोगाक्ष्यादिनिबंधनात्॥ उदक्याचेद्भवेत्पत्नी प्रसूताप्रयसत्यपि॥ अ
त्या न्यारंभविकर्मसुनराधिर्नतन्मतात्॥ ज्येष्ठान्यारंभतेवह्निं बहुभार्यस्य
नेनराः॥ आपद्यग्निंषुदीप्यन्सुमासार्धंचेन्नदृश्यते॥ सर्वहोमानतिक्रांतान्य
क्षांतेपक्षहोमवत्॥ समस्यजुहुयात्सश्रादिष्टस्तुमतीभवेत्॥ नत्वत्र

नराधेयमितिकौषितकीश्रुतिः॥ वत्सरंवत्सरार्धंवाहोमलोपेमतांतरे॥ आप
स्कालेननश्यंतिदीप्यंतःस्युर्हुताग्नयः॥ एकस्यामप्यतिष्ठंत्यामग्निहोत्रसमो
पतः॥पतिस्तिष्ठतिचेदग्निनाशोनेत्यपरेविदुः॥ ॥ इतिपुनराधानप्रकर
णं॥ ॥ जायमानोवैब्राह्मणस्त्रिभिर्ऋणवान्जायतेब्रह्मचर्येणऋषिभ्यो
यज्ञेनदेवेभ्यःप्रजयापितृभ्यइतिप्रजानंतुमाययत्मेत्मीत्यादिश्रुतिभ्यः
प्रजोत्पत्तेरुत्तरांतरपरिग्रहस्यसर्वाधानेनाहिताग्नेरग्निहोत्रसंस
र्जविधिरुच्यते॥ ॥ जायामवाप्यदर्शेहन्येकादशोवाआहिताग्निररण्या

रग्नीन्समारोप्योदवसायमथित्वाग्नीन्चिहत्वाग्नेयमष्टाकपालंवैश्वानरंद्वा
दशकपालमितिद्विहविष्कामिष्टिंकृत्वावितानाग्नेरौपासनाग्निंसंसृजेत्॥
वितानाग्नेरौपासनाग्निसंसर्गनिमित्तंवाग्नीनाधास्यतिसंकल्पज्येष्ठ
भार्यायाश्चारण्योरग्नीन्समारोप्यसंभारस्यर्ग्यादिहोमांतंआधानंकृ सर्वौषध
र्यात्॥कनिष्ठौपासनाग्नेःसर्वौषधहोमः॥ ततस्तस्मिन्नेवाग्नौब्रह्मौदनंश्र
पयित्वापत्नीहयेनाचारण्यःअधरोत्तरारणीनिष्पनंकुर्यात्॥आधाने
तुशेषनक्तप्रकारेपस्मात्तंहयसंसर्गंकृत्वापूर्ववत् सर्वंकार्यं॥औपासनं त्मानं१
२ततःपावमानेष्टिंकुर्यात्॥एवमविहुतमाधानप्रयोगंसमाप्यतंतुमतीकुर्यात्॥ततः
पवित्रेष्टिंकृत्वात्रेधातवीकुर्यात्॥२

उ मंउनः॥ ग्राहिताग्निग्रजाहानींयोषापत्यांमतप्रजां॥ द्वादशेपंचदशे संवत्सरेस्त्रियं॥ स्य दशमे
१० स्कान्यामुद्वहेत्कन्यांसघस्त्रप्रियवादिनीं॥ ग्रारोप्याग्निमघारण्योरुदवस्येत्सहाग्निभिः॥
उद्वासनेष्टिं कृत्वाथतमारोप्यहविर्भुजं॥ कृत्वा ब्रह्मौदनाग्निं चनथौपासनपावकं॥ ब्रह्मौ
दनाग्निकंसिद्धं कृत्वाचाग्निंविधानतः॥ पवित्रेष्टिंतंतुमतींत्रेधातव्यांक्रमायजे
त्॥ ऐंद्राग्नेनैवपशुनायष्टव्यंग्रवत्तेनवा॥ ग्रथवापुनराधानमेवात्रेष्टंनेचेतर
त्॥ धर्मप्रजासमृद्धेषुदारेष्वग्निलोभतः॥ ग्रन्यांसमुद्वहेद्दारांतदाप्रवोदितो
विधिः॥ ग्रनुष्यायमृगारेष्यायजेतेवात्मशुद्धये॥ नादध्याद्दाग्नेरिष्टिंपूर्वप १०

त्यासहाचरेदिति॥ ग्रत्राहभगवान्बौधायनः॥ यदाहिताग्नेः प्रजानोमद्यतेकथंतत्रकु
र्यादितिपुनरेवकुमारीं॰सं॰स्कृत्यदशमेहन्येकादशाहेवारण्योरग्नीन्समारोप्यो
दवसायमधित्वाग्नीन्विहृत्योद्वासनेष्टयेष्टातदानीमेवारण्योरग्नीन्समारोप्योपास
नेब्रह्मौदन॰श्चपयित्वोपवसथप्रभृतिप्रसिद्धमग्न्याधेयंकुर्वंतितस्मिन्संस्थि
तेपवित्रेष्ट्यायजेततस्या॰संस्थितायांतंतुमतींनिर्वपेत्ततस्या॰संस्थितायां
त्रेधातव्यांनिर्वपेदपिवैंद्राग्नेनपशुनायजेतपुनराधेयंवाकुर्याद्यएकोबह्वीर्जा
यास्प्रयुंजानएवमेवैतत्कुर्यात्तस्मादेकोबह्वीर्जायाविंदतेतिह्याह्यपारस्यग्नि

११ दयसंसर्गविधिः॥ अथाहिताग्निव्रतानि॥ आधानादूर्ध्वरात्रमाहिताग्निर्न तरी न
स्यात्॥ तदुक्तं॥ नान्तंवदेत्॥ नमांसमश्नीयात्॥ नवासःप्रक्षालयेत्॥ मिन्नयेन न
पिबेत्॥ नस्नात्वोच्छिष्टंदद्यात्॥ नपादौप्रक्षालयीत॥ नलवणमश्नीयात्॥ न
कोद्रवीधान्यमश्नीयादन्यत्रतिलेभ्यः॥ नासंध्यांस्यात्॥ नकालयोर्भोजनंकुर्यात्॥
आज्यपूर्वंहविष्यमश्नीयात्॥ नान्यस्यार्त्विज्यंकुर्यात्॥ नांजीत॥ नाभ्यंजीत॥ न
दंतधावनंकुर्यात्॥ एतानिव्रतानि॥ एतद्धोपेव्रातपतीष्टिरुक्तेआग्नयेव्रत
पतयेस्वाहेतिपूर्णाहुतिंकुर्यात्॥ इष्ट्यनधिकारात्॥ अजातपुत्रस्यक्रतुग ११

ध मनेनदोषः॥ वासःप्रक्षालननिषेधऊषादिना॥ नात्यंतिकः॥ स्वयंपादप्रक्षालनेनदो
षः॥ पर्णादिनादंतधावने च॥ इत्याहिताग्निधर्माः॥ तदति क्रमेप्रायश्चित्ताभ्यधि
धीयंते॥ आहिताग्नेर्व्रीहियवरूसरादिभक्षणेनिषेधमाह॥ व्रीहियवरूसरसंयावपाय
सापूपशष्कुलीः॥ आहिताग्निर्द्विजोभुंक्तेआजात्यंसमाचरेदिति॥ आहिताग्नेः
शुनादंशेएकरात्रंपयःपानं॥ नाभेरूर्ध्वंदिरात्रं॥ वक्त्रेत्रिरात्रं॥ मस्तकेचतूरा
त्रमित्यंगिराः॥ इदंचसम्यक्दष्टविषयं॥ इषदृष्टेनाभेरधःआपोहिष्ठेत्यादि
भिःस्नानंप्राणायामत्रयंच॥ नाभेरूर्ध्वंद्विगुणं॥ मस्तकेचतुर्गुणमितिस्म

१२ त्यर्थसारोक्तेः॥ इदंचश्वगालकृकलाशवानरखरोष्ट्रनरवराहगोमहिष्यजाविन
कुलमार्जारकुक्कुटकाकमूषकाद्युपलक्षणं॥ यत्तपार्श्वेपैठिनसिः॥ गजोष्ट्रच
मंनारीसमारूढ्याथवापुमान्॥ योजनेयोजनेकृच्छ्रमग्निश्चापिविनश्यति॥ अत्र
गजारोहणंब्राह्मणपार्श्वेव॥ राज्ञांगजारोहणस्यबहुषुपुराणेषुदर्शनात्॥ यस्य
छत्रंहयश्चेवकुंजरारोहमद्रिमत्॥ ऐंद्रंस्थानमुपासीनंतस्मान्नंनविचारयेत्॥
इतिमार्कंडेयपुराणे॥ याज्ञवल्क्यः॥ अग्निहीनस्यशूद्रस्यनाद्यादन्नमनाप
दीति॥ एतदन्यतमान्नभोजनेप्रायश्चित्तमाहमनुः॥ भुंजानोन्नंतुशूद्रस्यत्र १२

मत्याक्षपयेत्त्र्यहं॥ मत्याभुक्त्वाचरेत्कृच्छ्रमिति॥ आपदितुसकृद्भुक्त्वाएकोपवासः॥ द्व
हेब्रह्मकूर्चैः॥ अज्ञानादनापद्यपिसएव॥ ज्ञात्वाद्यपिसकृज्जग्ध्वाप्राजापत्यः॥ ब्रह्म
कूर्चस्यअहेपवित्रकल्पः शक्तावशक्तौविषयः॥ अत्रभोजनेन॥ किंतुगव्यान्नमा
त्रसंयोगंकृत्वाप्रायश्चित्तंचरेत्॥ अवप्राश्याद्यपीतिपरा ःरः॥ घृतंचै
वोष्मपाचैवस्पृष्ट्वाचप्रतिगृह्यच॥ प्रशंस्यस्वस्तिचेत्युक्त्वाभोक्तैवतुनसंशय
इति॥ सएव॥ अनुग्रहंतुवक्ष्यामिमनुनाचोदितंपुरा॥ आमंवायदिवापक्वंशू
द्रान्नमुपसाधयेत्॥ किल्बिषंभुंजतेभोक्तायश्चविप्रःपुरोहितः॥ गुर्वर्थंमतिथी

स्यानां

१३ नांचभूंचविशेषतःप्रतिगृह्यप्रदातव्येनतुत्पेत्स्वयंततः॥शूद्रान्नरसपुष्टस्य॰अ
धीयानस्यनित्यशः॥जपतोजुहृतोवापिगतिरूर्ध्वानविद्यते॥षण्मासमपियोभुंक्ते
शूद्रान्नंचनिरंतरं॥जीवन्नेवभवेच्छूद्रोमृतःश्वाचाभिजायते॥॰अकृत्वेवनि
वृत्तिंयःशूद्रान्नाश्नातेद्विजः॥॰आहिताग्निर्विशेषेणसशूद्रगतिभाग्भवेत्॥
व्यासः॥शूद्रान्नरसपुष्टस्यदित्योरपिचनित्यशः॥जपतोजुहृतोवापिगति
रूर्ध्वानविद्यते॥मृतसूतकपुष्टांगोद्विजःशूद्रान्नभोजनः॥॰अहमेवनजानामि
कांकांयोनिंसगछति॥गृध्रोद्वादशजन्मानिदशजन्मानिसूकरः॥श्वान्चै १३

यसगजन्मानीत्येवंमनुरुवाच ह॥शूद्रान्नेनोदरस्थेनयःकश्चिन्म्रियतेद्विजः॥सम त्
वेत्सूकरेग्रामेतस्यवाजायतेकुले इति॥आपस्तंबः॥यस्तुभुंक्तिशूद्रान्नंमास
मेकंनिरंतरं॥इहजन्मनिशूद्रत्वंमृतश्चश्वाभिजायते॥शूद्रान्नंशूद्रसंस्पर्शः
शूद्रेणचसहासनं॥शूद्रान्नस्नानागमश्चैवज्ञेयंतमपिपातयेत्॥आहिताग्नि
स्तुयोविप्रः शूद्रान्नेनप्रवर्त्तयेत्॥पंचतस्यप्रणश्यंतिआत्माब्रह्मत्रयोग्न
यश्चतिसुमंतुः॥राजान्नंतेजआदत्तेशूद्रान्नंब्रह्मवर्चसं॥आयुःसुवर्णकारान्नं
यशश्चर्मावकर्त्तिनः॥कारुकान्नंप्रजांहंतिबलंनिर्णेजकस्यच॥गणान्नंगणि

ROYAL ASIATIC SOCIETY LIBRARY OF THE BOMBAY BRANCH

१४ कान्नंचलोकेभ्यः परिक्रंतति॥रूपंचिकित्सकस्यान्नंदृश्यन्नाश्रान्नमिंद्रियं॥विष्ठा
वार्द्धुषिकस्यान्नंशस्त्रविक्रयिणोमलं॥एतेभ्योयेत्वभोज्यान्नाःक्रमशःपरिकी
र्त्तिताः॥तेषांत्वगस्थिरोमाणिवदंत्यन्येमनीषिणइति॥तथायोगृहीत्वाविवा
हाग्निंगृहस्थइतिमन्यते॥अन्नंतस्यनभोक्तव्यंवृथापाकःसउच्यते॥वृथापा
कस्यभुंजानःप्रायश्चित्तंचरेद्द्विजः॥प्राणायामंत्रिरभ्यस्यघृतंप्राश्यविशुध्य
तीति॥आपदिशूद्रान्नकदाम्नप्रतिग्रहेदिनांतरभोजनेनदोषः॥अनापदि
त्यामप्रतिग्रहेसप्तरात्रं॥अभ्यासेतुमासषट्कं॥अतऊर्ध्वंनिष्कृतिः॥श्रो १४

त्रियागारेशूद्रादिभिःस्वद्रव्येदत्वाकारितस्वपर्याप्तान्नं तद्भोजनेचांद्रायणमि
तिमाधवः॥स्मृतिचंद्रिकायांमनुः॥येशूद्रादधिगम्यार्थंअग्निहोत्रमुपासते॥
ऋत्विजस्तेहिशूद्रस्यनाग्निषुगर्हिताइति॥उपधायोधनंशूद्रादिप्रोक्षिते यमः
तधर्मवित्॥यजमानस्तुभिक्षित्वाचांडालःप्रेत्यजायतइति॥याज्ञवल्क्यः॥
चांडालीजायतेयस्तुकरणाच्छूद्रभिक्षितादिति॥सुमंतुः॥यस्यार्थमर्थंभिक्षि
त्वायःसर्वंनप्रयच्छति॥सचातिरासभंविप्रःकाकतांयातितंसमाः॥यमः॥
यस्यार्थंभिक्षितंद्रव्यंअन्यत्रविनियोजयेत्॥श्वपाकयोनौजायेततत्तु

या
त्कौतिदुर्गतिमिति ॥तथा॥यज्ञार्थंभिक्षितंद्रव्यं॰अन्यत्रविनियोजयेत्॥श्राद्धादौ
१५ स्याद्पाङ्क्तेयोभासयोनिंचगच्छतीति॥यानितुत्रिकांडमंडनेवचनानि॥निर्ध
नोधनसाध्येषुनित्येष्वधिकृतोयदि॥चौर्याद्न्यैःकुमार्गैश्चरत्यर्थंधनमर्ज
येत्॥सूर्यग्रहेकुरुक्षेत्रेमेषीरुरुाजिनादिकं॥चोऽलात्प्रतिगृह्यापियजे
दावश्यैकैर्मखैरिति॥तानिनदुष्टप्रतियहानुग्रहकारकाणिकिंतुनित्यकर्म
यां॰आवश्यकताद्योतकानि॥यदीपक्रांतो यज्ञोमध्येकथंचित्प्रतिबद्ध
स्तदाश्रद्धादेस्तदाहत्यारब्धंकर्मसमापनीयमेवेत्याहुः॥मनुः॥यज्ञश्चेद्वे १५

प्रतिबद्धःस्यादेकेनांगेनयज्वनः॥आत्मापस्याधिदेवेषाधार्मिकेसतिराज
नि॥योवैश्यःस्याद्बहुपशुर्हविष्कृतुरसोमपः॥कुटुंबात्तस्यतद्द्रव्यं॰आहरेद्य
त्तसिद्धये॥॰अहोरात्रापिवाद्वारेकामंशूद्रस्यवेश्मनः॥योह्याहिताग्निःशा
तगुर्यज्ञंचैवसहस्रगुः॥तयोरपिकुटुंबाभ्यांआहरेदविचारयन्निति॥
षेण विप्रौतिक्षत्रियादेरपिप्रारब्धे प्रतिबंधकेकथंचिद्यदिसमापनेवि
धीयते॥एवमपिद्रव्यात्तापेत्रिकांडमंडनस्य वचसांप्रवृत्तिः॥परंतुतत्त
द्बहुप्रतियहेणयज्ञादिकरणेतत्तत्प्रायश्चित्तंभवत्येव॥तदाहमनुः॥जपित्वा

१६ त्रीणिसावित्र्याःसहस्राणिसमाहितः॥मासंगोदेपयःपीत्वामुच्येतासप्तति
यत्रादिति॥समाहितःब्रह्मचारीमासंगोदेवसन्नत्रिसहस्रंजपेत्पयश्च
पिबेदित्यर्थः॥अभ्यासेतुहारीतः॥पवित्रेष्याविश्वुद्ध्यंतिसर्वेघोराःप्रतिग्र
हाः॥एंदवेनृमृगारेष्याकेचित्त्वमित्रमिंदयाश्वषष्ठेकालेपयोभक्षःपूर्णिमा
सेप्रमुच्यते॥तर्पयित्वाद्विजान्कामैःसततंनियतव्रतइति॥प्रतिग्रहेऽस
त्यंदेशतःकालतोजातितःस्वरूपतश्च॥अन्यतरासत्वेषट्त्रिंशन्मते १६
पवित्रेष्याःमृगारेष्याःमित्रविंदायाश्चविकल्पेनविधानात्॥पवित्रे

ष्यादयोवक्ष्यंते॥यत्तपार्श्वे॥राजप्रतिग्रहोघोरोमध्यास्यादोविषोपमः॥पुत्र
मांसंवरंभोक्तुंनतुराजप्रतिग्रहइति॥यथा॥नकुर्यान्कृषिवाणिज्यंसेवांचैव
तथेवच॥ब्राह्मणाद्वीयतेनेनतस्मात्सर्वंचवर्जयेत्॥ग्राममध्येगतोया
वच्चवस्तिष्ठतिकस्यचित्॥ग्रामस्यतस्यचाक्षोचंनिर्गतैश्चुचितामियादिति
॥मनुर्विहितस्याक्षोचस्यापवादमाहपराशरः॥ब्रह्मचारीगृहेयेषांहूयते
चहुताशनः॥संपर्कंचनकुर्वंतिनतेषांसूतकंभवेदिति॥तथा॥राजान्न
दातापितरोंचार्यर्त्विक्पुरोहिताः॥एतेषांप्रतिकूल्येतुप्रसाद्येवविशुध्य

वा

नीति॥तथा॥अन्नदोषमयदश्चैवं तथाऽत्रिर्विपुरोहित :॥एतेगुरुसमाख्ये यानेषु प्रतिमुख
१७ श्चरेत्॥यथायथागुरुर्ब्रूयात्तत्कार्यमविशंकया॥निग्रहेनुग्रहेवापिगुरुःसर्वत्रकारण
ही मिति॥अथवैभवतियःपाप यक्ष्मग्रैनःस्याद्योकापरा ध्येतदेवेभ्यऋषिभ्यःपितृभ्यो
गोभ्रात्मलोभ्यःस्तेयेनाभिशस्तोऽभिशस्यमानोवारहस्येष्वायजेतेतिबौधायनः॥त
था॥उपास्यपश्चिमांसंध्यांकृत्वाग्निंतमुपास्यच॥श्रुत्वेःपरिवतोभुक्तानातित्तो
थसंविशेत्॥इति॥द्वितीयभोजनस्यावश्यकत्वेऽतोभार्यामुपेयादित्यत्रनियमवि
धिंसाधयतामिताक्षराकारेणसायंप्रातर्द्विजातीनामशनेश्रुतिचोदिते॥नांतरा १७

भोजनंकुर्यादग्निहोत्रसमोविधिरिति॥अत्रनियमार्थत्वेनसाधितं॥तेनद्वितीयभोज
नेसमर्थेनतदकुर्वतापाणायामश्रुतंकारयेत्प्रायश्चित्तं॥सर्वपापापनुत्तयेप्येतत्॥
ना उपपातकजातौमनादिष्टेषुचैवहीति॥प्रायश्चित्तमाचरणीयं॥इदमेवसर्वत्रस्मृ
त्युक्तानादिष्टेप्रायश्चित्ते॥तथाचमनुः॥वेदोदितानांनित्यानांकर्मणांसमतिक्रमे॥
स्नातकव्रतलोपेचप्रायश्चित्तमभोजनमिति॥एतदपवादोमाधवीयेशेषागमे॥
अत्यंतरोगयुक्तेगेराजचोरभयादिषु॥गुर्वग्निदेवकृत्येषुनित्यहानेनपापभा
गिति॥पर्वण्यस्त्रीगमनेप्यभोजनमेवेतिभृग्वंगिरसौ॥यदाकदाचादियोमेथुनेगो

१८ यानेवानभ्यासेस्नात्वोंप्राणायामइतिमनुः॥नमनोपरस्त्रियंदृष्ट्वादिनमेकमभोज्य
नमितिश्रुलपाणिः॥एतस्यचप्रतिपदोक्तप्रायश्चित्तेःसमुच्चयः॥यआहिताग्निर्दुस्व
प्नमिमित्तंश्रुतादिदर्शन निमित्तंभयंपश्येत्॥यतइंद्रभयामहे॥ऊतयेऽस्वा
हा॥स्वस्तिदाविशा॥स्वाहा॥इंद्रोदेवता॥इदंस्तुवाकुतिहृयंसर्वाधानिनालोकि
काग्नोऽथर्वाधानिनास्मार्त्ताग्निमताचोपासने होतव्ये॥यक्षचोरभयएवेतिश्रु
तद्वयीभाष्ये॥वकुभार्यस्याग्निहोत्रशुश्रूषायांविशेषमाहमाधवीयेकात्याय
नः॥अग्निहोत्रादिशुश्रूषांवकुभार्यःसवर्णया॥कारयेत्तद्धुत्वेचज्येष्ठयाग १८

हिंतानचेत्॥तथावीरप्रसूर्याचआज्ञासंपादिनीचया॥दक्षाप्रियंवदाशुद्धातास
त्रविनियोजयेत्॥निरग्नेपाकर्मयथाज्येष्ठमशक्तिनः॥विभज्यसहवाकुर्युर्यथा
ज्ञानमशक्तिनइति।प्रजापतिः॥दर्शंचपोर्णमासंचलुप्तंह्युभयमेववा॥एकस्मि
न्कृछ्रपादेनद्वयोरर्धेनशोधनं॥हविर्यस्येष्टशक्त्यलुप्तमप्येकमादितः॥प्रा
जापत्येनशुध्येतपाकसंस्थासुचैवहि॥संध्योपासनहानेतुनित्यस्नानंविलुप्य
च॥होमेनैमित्तिकेशुध्येद्वायज्ञ्यएसहस्रकृत्॥समांतेसोमयज्ञानांहानेचां
द्रायणंचरेत्॥अकृत्वान्यतमंयस्तंयज्ञानामधिकारतः॥उपवासेनशुध्येत

१९ सु पाकसंस्थौचैवहि॥ कात्यायनः॥ पित्र्यन्नात्ये येचैव वैश्वदेवात्ये पिच॥ अनिष्टा नवयसेननवान्नेप्राश्नेतथा॥ भोजनेपतितान्नस्यचरुवैश्वानरोभवेदितिस्मा र्त्तविषयं॥ आहिता ग्नेरिष्टिविधानात्॥ तथा॥ विकच्छोनुत्तरीयश्चनग्नश्चावस्त्र एवच॥ श्रौतंस्मार्त्ततथाकर्मननग्नश्चिंतयेदपि॥ नग्नोमलिनवस्त्रःस्यान्नग्न श्चाईपटःस्मृतः॥ नग्नस्तूदग्धवस्त्रःस्यान्नग्नःस्यूतपटस्तथेति॥ धौतवस्त्रो भावेयाज्ञवल्क्यः॥ अलाभेधौतवस्त्रस्यशाणक्षौमाविकानिच॥ कृतपंयो गपट्टंचविवासास्तुनवेभवेदिति॥ कुशधारणमाह शातातपः॥ जपेहोमेच १९

दानेचस्वाध्यायेपित्र्यतर्पणे॥ अश्रून्यंतुकरंकुर्यात्सुवर्णरजतैःकुशैरिति॥ अस्ना तस्यहोमेनिषेधमाहदक्षः॥ अस्नात्वानाचरेत्कर्मजपहोमादिकंतथेति॥ प्रातः स्नानसंक्षेपमाहसएव॥ अस्नात्वाहोमकालस्यबहुत्वात्स्नानकर्मणः॥ प्रातःसं क्षेपतः स्नानंहोमलोपोविगर्हितइति॥ ऊर्ध्वपुंड्रस्यावश्यकतेत्यत्रब्रह्मांड पुराणे॥ पूजाकालेचहोमेचसायंप्रातःसमाहितः॥ नामान्युद्धार्यविधिनाधा रयेदूर्ध्वपुंड्रकमिति॥ कर्मकालेऽधरांगस्पर्शनिषेधंवाह्निर्यमंचाहबोधाय नः॥ नाभेरधःस्पर्शकर्मसुसंयुक्तोवर्जयेदिति॥ जपकालेनभाषेतव्रतेहो

मादिकेषु चेति॥ लोपेयाज्ञवल्क्यः॥ यदि वाग्यमलोपः स्याज्जपादिषु कदाचन॥ व्याहरे
द्वैष्णवं मंत्रं जपेद्वा विष्णुमव्ययमिति॥ दक्षः॥ संध्याकर्मावसानेतु स्वयं होमो वि
धीयते॥ स्वयं होमे फलं स्यात्तदन्येन न लभ्यते॥ होमे यत्फलमुद्दिष्टं ऋतुकृतः स्वय
मेव तु॥ * यमाने तदन्येन फलमर्द्धं प्रपद्यते॥ दक्षः॥ ऋत्विक्पुत्रो गुरुर्भ्राता मा
तुलो योथ विद्धतिः॥ एतैरेव कृतं यत्स्यात्तत्कृतं स्वयमेव तु॥ होतारं तम्यमाहा
त्रिः॥ अन्येनानुकृतौ होमादेकोद्यात्मकृतोचरमिति॥ यजमानयोरसान्निध्ये
होमस्यनेष्यत्यमाहगोपालः॥ असमक्षं तुदंपत्योर्होतव्यं नर्त्विगादिना॥ द्वे
× दे कः शिष्यकृतोवरं॥ शिष्यैः शतकृतो होमादेकः पुत्रकृतोवरं॥ पुत्रैः शतकृता ×
× होमा × २

योरप्यसमक्षं तुभवेद्धुतमनर्थकमिति॥ कात्यायनः॥ नैवकन्या न युवतिर्नो
त्पविद्योनबालिशाः॥ होतास्यादग्निहोत्रस्य नार्त्तो नासंस्कृतस्तथा॥ नरकंहि
पतंत्येतेजुहुतः सचयस्यतत्॥ तस्माद्वैतानकुशलो होतास्याद्दपारगइ
ति॥ जपहोमादिकुर्वतश्चाग्निवादननिषेधमाहापस्तंबः॥ जपंहोमंचकु
र्वीणो नाभिवादयेत्तथाद्विज इति॥ संध्यानुष्ठानस्यबहिर्देशेप्राप्तस्यापि॥
उपसंध्येतुकर्त्तव्ये ब्राह्मणेनगृहेपीतिविधानेआहिताग्निपरं॥ तस्योद्धर
णोत्तरमाहोमसमाप्तेर्बहिर्गमननिषेधात्॥ अतएवकेशवः॥ अध्वर्योरपि

२१ विहरणोत्तरं विहारमध्येवसंध्यानुष्ठानमाह॥नचसंध्याहोमयोःसमानका
लतायांप्रारब्धतंत्रत्वाद्धोमस्यप्राबल्येनसंध्योत्कर्षःशंक्यः॥संध्याहीनोः
शुचिर्विप्रोऽयनर्हःसर्वकर्मसु॥यदन्यत्कुरुतेकर्मनतस्यफलभाग्भवेदिति
दक्षवचसाऽनुत्कर्षविधानात्॥त्रिधाविभक्तस्याह्नोद्वितीयभागः समि
त्कुशाद्याहरणकालः॥समित्पुष्पकुशादीनांसकालःसमुदाहृतइतिद
क्षोक्तेः॥आहिताग्नेर्वृथाप्रवासनिषेधोमार्कंडेयपुराणे॥प्रज्ञास्तोनप्रवा
सोस्तिब्राह्मणानांकथंचन॥यतोगृहेद्विजातस्यनिष्पत्तिःसर्वकर्मणां॥ २१

नां
नित्यनैमित्तिकौतुहानिरेवप्रवासिनां॥१

हु
नित्यनैमित्तिकानांहिहान्यान्निर्द्विजन्मनां॥सायंप्रातर्हुतंहव्यंलोकान्यच्छतिशा
श्वतान्॥त्रैलोक्यमेतदखिलंहव्यएवप्रतिष्ठितं॥अग्नीषाबर्हिषःशय्यासन
तेचत्रयोऽग्नयः॥रम्यंचैवाग्निरारण्येवैरिविष्टारणीतथा॥नभोगार्थाहिवि
प्राणांन्यासतेचवरूथिनी॥इहलोकायविप्राणांचेष्टाचेत्फलायच॥पक्षे
णकर्मणोहान्याप्रयान्त्यस्वस्यतांनरैःति॥नित्यकर्मपर्यायहव्यस्यप्रवासं
विनाऽलाभेनुद्व्यार्जनार्थंप्रवसेन्नतुतीर्थार्थं॥तदाहत्रिकांडिः॥धनान्य
र्जयितुंयुक्तःप्रवासोह्यग्निहोत्रिणः॥धनैर्हिसंभवेद्दि ज्यातीर्थार्थंनतु

२ द्वीपेकडंकरीयेवारात्रिचान्यामवर्तिनि॥पापरूत्सुचविप्रेषुनियताजंतुरत्रक ३

२२ व्रजेदिति॥ तत्राप्यवधिं दर्शयति॥ कालतश्च सएवाह॥ अग्निहोत्रेण रहितः पंथानं शयनयोजनं॥ आहिताग्निः प्रयायाच्चेदग्निहोत्रं विनश्यति॥ अर्द्धं स्वयमनुक्त्वा नो हावयेदृत्विगादिना॥ तस्य स्यात्पुनराधानं पवित्रेष्टिरथापिवा॥ बौधायनः॥ अथैतत्सोऽपरिमितं प्रवसति संवत्सरमिति प्रवसन्नित्यविशेषाज्ज्ञायापत्योराहिताग्नेर्विज्ञायतेऽर्द्धवाएषआत्मनोयत्पत्नीचेति॥ तेनपत्नी प्रयासेप्येतत्प्रायश्चित्तं॥ स्मार्त्ताग्निमतश्चंद्रिकायांपैठिनसिः॥ प्रस्खलीकृतधर्मस्यपीड्यमानस्यरक्षिभिः॥ मासद्वयं प्रयासोऽग्निपरतो २२

नाहिताग्निर्वदिति॥ यज्ञपार्श्वे॥ नाग्निकार्यस्यवेत्तायां प्रवसेन्नचपर्वणि॥ न विनाचनिमित्तेनक्रीडाद्यर्थंतुनव्रजेत्॥ आहिताग्निस्त्र्योलोमात्रवासंपर्व संधिषु॥ करोतिपुनराधानंप्रायश्चित्तमतोऽन्यतो॥ अपरिमितंप्रोष्यनूपवसथसमीपेत्रयोदश्यांचतुर्दश्यांवानगच्छेत्॥ सोधःशायीप्रवसेत्॥ आमिषवर्जंभुंजीत॥ बहुपत्नीकएकयासहगच्छेच्चेन्मैथुनंनकुर्यादितिकेशवः॥ एकयासहगमननिमित्तेपिक्रमोढाश्रद्वास्त्रीविषयमितिचंद्रिकायां॥ यद्वाबहुपत्नीकस्यैकयासहगमनप्रसक्तिःतदाधानेऽननुप्रविष्टपा

२३ र्थीविषयमिति॥अग्निहोत्रकोऽग्निस्मृतिचंद्रिकाकारउदाजहार॥अविष्णामेक
यासहगमननिषेधादिति॥अत्रोऽपुराणे॥अनापद्यपिधर्मेणविप्रस्य
याजतस्तथा॥गृह्यंत्रानिग्रहंविप्रोनधर्मात्परिहीयतइति॥तथा॥आ
हिताग्निरनङ्वांश्चब्रह्मचारीनपैवच॥अश्नंतएवसिध्यंतिनेषांसिद्धिर
नश्नतां॥इक्षुक्षीरविकाराश्चभ्राष्ट्रभृष्टयवान्नपि॥यदन्नंवारिहीनंच
पक्वंकेवलपावके॥तदन्नंफलवद्ग्राह्यंश्रुत्यादपिनदुष्यति॥यच्चाप्यबुधि
नाधान्यंपाचितंजानवेदसि॥तदन्नंफलवद्ग्राह्यंश्रुत्यादपिनदुष्यति॥तं २३
मिति॥यज्ञपार्श्वे॥परान्नंपक्वंनाश्नीयात्सवासेनाग्निहोत्रिणा॥३

उक्तोऽग्निसंयोगात्सिद्धंत्रयाणांयोगतःश्राद्धंत्रितयसंयोगात्अन्नंभवति
तत्सपात्॥परान्नंपक्वंनाश्नीयादुक्तोरसमंतरा॥आहिताग्नेरयंधर्मो
याज्ञिकानांतुसंमतः॥बृहस्पतिः॥सर्वाधान्यथवाप्यर्धाधानीवाह्यावस
थ्यकः॥परस्परंतुभुंजीयुरविरुद्धास्त्रयोमताइति॥वह्नेरोनकः॥सर्वाधा
नीदक्षिणाग्नेरुत्तरात्पाकादिकंचरेत्॥तदर्थमेवसत्रेयोवर्त्तेकर्मणिलौकि
कः॥अचेताः॥वर्त्तेहोमेतुनएःस्यात्कदाचिद्दक्षिणाग्निकः॥सायंकृत्वा
तुकर्त्तव्यंभोजनंविधिपूर्वकं॥पचनाग्नेरपचेदन्नंनपचेल्लौकिकाग्निके॥

२४ यदिभोत्सापचेदन्नंभुक्त्वाचोद्वायपंचरेत्॥स्त्रियातत्यक्तः॥गृहीत्वाग्निंसमारोप्य
यःपरान्नंनिषेवते।अमोज्यान्नोगृहस्थोसौवेदबाह्यःप्रगर्हितः॥परान्नेनोदरस्थे
नयोभार्यामुपगच्छति॥यस्यान्नंतस्यतेपुण्यान्यन्तइतःप्रवर्त्तते॥वरंकंदफलाहारोवरंयायोभक्षणं॥पुत्रमांसंवरंतातनानग्नेर्गृहभोजनमिति॥आहिताग्नेःपत्नीसहितस्याग्निंविहायनप्रवासरतिपूर्वं मेवोक्तं॥यत्तुविराटपर्वणि
नष्टचर्यारंभेधौम्येनपुरोहितेनस्वास्त्रंप्रतिनयनंश्रूयतेयुधिष्ठिरेणनीं
तरन्येषांब्राह्मणानामप्रयोजकं॥कुतःपांचालीगतसर्वधर्माणांत्रन्यत्रापि २४

तेः॥किंचक्षत्रियकर्त्तृकनष्टचर्याविधौविहितस्यपुरोहितकर्त्तृकाग्निनयनस्यतादृग्विधानात्तास्त्र
२५ त्येवप्रकृतेनान्यत्रप्रसक्तिः॥भिन्नाएवाहिताग्निक्षत्रियधर्माभिन्नाश्चब्राह्मणानां॥यथाहाश्वला
यनः॥राजन्यश्चाग्निहोत्रंजुहुयात्तपरिचरेद्ब्राह्मणायेतरंकालंभक्षमुपहरेदतसत्यशीलःसो
मसुत्सराच्छुध्यतीति॥त्वत्रोर्द्वोपेक्षयोपलक्षणार्थइतिवक्तिरुद्रः॥तथासोमयागेक्षत्रियस्य
यजमानस्यसोमपानाभावान्नब्राह्मणस्य॥तथाराजकार्यंपुरोहितेवचनेनक्षत्रियकर्म इति
र्त्तृ णांपुरोहितकर्तायाएवाम्नातंतत्रकोचनाचेति॥एतेनवत्सरामतीर्थयात्रायांपत्नीपुरोहि
ताभ्यामाहरणमग्नीनांचव्याख्यातं॥॥इत्याहिताग्निधर्माः॥अथादीक्षमनंतेनगुरु
णाकरुणाब्धिना॥आधानेनोचरंप्रायश्चित्तंनचोदितं॥॥इत्यनंतदेवीयरघुनाथविरचि २५
तेप्रायश्चित्तकुतूहलेआधानप्रकरणंसमाप्तं॥॥७॥ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इतिप्रायश्चित्तकुतूहलेआधानप्रकरणं॥